International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(1): 68-73
© 2024 IJMH
www.themultijournal.com
Received: 19-04-2024
Accepted: 26-04-2024
Publish : 27-04-2024

**आचार्यः के. राजगोपालन्**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

# नाटकलक्षणम्

**आचार्यः के. राजगोपालन्**

**विषयसारः-**
काव्यवाङ्मये प्रमुखविषयो नाटकम्। मानवव्यवहारस्यानेके पक्षास्सार्वजनिकरूपेण द्रष्टुं शक्यन्ते। जीवानां सुखं दुखञ्च, हर्षशोकादयः, विविधमनोभावाः, विविधरुचयः, मनोरञ्जनस्य साधनानि, कलाः (गायनम्, क्रीडा, वास्तुकला, चित्रकला), संस्कृतिः, भाषा, परस्परव्यवहारः, वेषः, शृङ्गारः शिल्पम्, अलङ्कारः इत्यादिलोकव्यवहारो विविधसरणौ प्रवहति प्रकाशते च। एतल्लोकजीवनं रोचकमानन्ददायकञ्च कर्तुं नाटकस्य निर्माणमभवत्। यदा प्राकृतिकलोकव्यवहारो नाटकीयविकारद्वारा दृश्यमानो भवति तदा स मनोरञ्जको भवति, विभिन्नविधैस्संयोगैरानन्दञ्च जनयति। नाट्यशास्त्रसिद्धान्ताः लोककथानां ललितरूपेण प्रस्तुतीकरणस्य युक्तयस्सन्ति। आचार्यभरतो नाट्यशास्त्रे लोकव्यवहारं केन्द्रे संस्थाप्य नाट्यस्य नियमानामवतारमकरोत्। परन्तु कालेन विविधविप्रतिपत्तिकारणान्नाटकलक्षणम् आश्रित्य नाट्यकाराणां मतवैमत्यं दृश्यते। अतोस्मिन्प्रबन्धे सर्वेषां मतं विमृश्य नाटकलक्षणं प्रतिपाद्यते।

काविकर्मभूतस्य काव्यस्याचार्यैरिन्द्रियग्राह्यत्वदृष्ट्या दृश्यश्रव्यभेदेन द्वौ भेदौ स्वीकृतौ। तत्र श्रव्यकाव्यं काव्यमहाकाव्यगीतिकाव्यादिभेदैर्बहुविधम्। दृश्यकाव्यं त्वभिनेयमिति। दृश्यकाव्यमेव नाट्यरूपकप्रेक्ष्यादिविविधाभिधानैरप्यभिधीयते। प्रख्यापितस्य नाट्यस्य दशभेदाः भवन्ति। यथोक्तं नाट्यशास्त्रे-

**नाटकं सप्रकरणमङ्को व्यायोग एव च।**
**भाणः समवकारश्च वीथी प्रहसनं डिमः॥**
**ईहामृगश्च विज्ञेयो दशमो नाट्यलक्षणे॥**[1]

उपर्युक्तदशरूपकप्रभेदेषु सर्ववृत्तिविनिष्पन्नत्वात्सर्वरसाश्रयत्वाद्विविधबन्धसमाश्रयत्वाच्च नाटक-प्रकरणयोर्माहात्म्यमङ्गीक्रियते भरतमुनिना तदुक्तं नाट्यशास्त्रे-

**ज्ञेयं प्रकरणं चैव तथा नाटकमेव च।**
**सर्ववृत्तिविनिष्पन्नं नानाबन्धसमाश्रयम्॥**[2]

तयोरपि नाट्यभेदानां प्रकृतिभूतत्वात् कथावस्तुनः प्रसिद्धत्वान्नाटकं प्रकरणादपि प्रधानमिति। यदुच्यते रसार्णवसुधाकरे-

**आहुः प्रकरणादीनां नाटकं प्रकृतिं बुधाः।**[3]

नाटयति विचित्रं रञ्जनाप्रवेशेन सहृदयानां चित्तमावर्जयति नर्त्तयतीति नाटकम्। यद्यपि कथादयोऽपि सभ्यानां श्रोतॄणाञ्च हृदयं नाटयन्ति तथापि तत्राङ्कोपायादीनां वैचित्र्योत्पादकानां हेतूनामसत्त्वान्न तथा चित्तावर्जकत्वमिति न ते नाटकपदव्यपदेश्याः। वस्तुतो मानवीयैतिह्ये मनोरञ्जनस्य सर्वप्रमुखं प्रियतमञ्च साधनं विद्यते नाट्यम्। अस्य पर्यवेक्षणेन परनिवृत्तिर्हि भवति सहृदयानाम्। अत्र खलु मानवीयसंवेदनानां तथा दिव्यप्रतिनिधित्वं भवति येन कस्यापि सचेतसोऽन्तःकरणस्य स्वरतन्त्रयः

**Correspondence:**
**आचार्यः के. राजगोपालन्**
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

आनन्दिताः भवन्ति। नाट्यस्यावगाहनेन शोकार्त्तानां दुःखार्तानां श्रमार्त्तानां तपस्वीनाञ्च हृदयं विश्रान्तिं लभते।[4] एतदेव विचिन्त्य भणितमाचार्यवामनेन **काव्येषु नाटकं रम्यम्**।[5] तथा च साहित्यदर्पणकारेण नाटकलक्षणमुच्यते यथा-

**नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।**
**विलासद्ध्र्यादिगुणवद्युक्तं नानाविभूतिभिः॥**
**सुखदःखसमुद्भूति नानारसनिरन्तरम्।**
**पञ्चादिका दशपरास्तत्राङ्का परिकीर्तिताः॥**
**प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः॥**
**एक एव भवेदङ्गी शृङ्गारो वीर एव वा।**
**अङ्गमन्ये रसाः सर्वे कार्य्यं निर्वहणेऽद्भूतम्॥**
**चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृताः पुरुषाः।**
**गोपुच्छाग्रन्तु बन्धनं तस्य कीर्त्तितम्॥**[6]

एवमेव नाटकस्य स्वरूपं विवृण्वन् नाटकलक्षणरत्नकोशेऽलिख-दाचार्यसागरनन्दी- **किमिदं नाटकं नाम? उच्यते- देवादीनां पूर्ववृत्तानुचरितम्।**[7] अर्थाद्देवादीनामनुकार्याणामनुचरितं नाटकं निगद्यते। तच्च नाटकं रसेन परिपूर्णम्, महाभोग्यमुदारवचनान्वित-मलङ्कारैरन्वितन्तथा महापुरुषाणां चरितान्वितं भवति।[8] एवंविधस्यास्य नाटकस्यैतिवृत्तं द्विविधं भवति- उपात्तं प्रतिसंस्कृतञ्च।[9] आचार्यसागरनन्दिनः मतानुसारं नाटकस्यादौ विघ्नोपशान्तये सर्वप्रथमं नान्दी विधातव्या।[10] नान्दीपाठे देवद्विजनृपादीनामाशीर्वचनसंयुक्ता स्तुतिः प्रयुज्यते। नाटकस्य लक्षणं विस्तरेण प्रतिपादयता निगदितं नाटकलक्षणरत्नकोशे-

**प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकम्।**
**राजर्षिवंशचरितं तथा दिव्याश्रयोत्थितम्॥**
**नानाविभूतिसंयुतामृद्धिविलासादिभिर्गुणैर्युक्तम्।**
**अंकप्रवेशकाढ्यं भवति हि तन्नाटकं नाम॥**[11]

अर्थाद्यस्येतिवृत्तं प्रख्यातं भवति, नायकोऽपि प्रख्यातस्तथोदा-त्तगुणोपेतो भवति, राजर्षिणां वंशचरितं यत्र वर्ण्यते, दिव्यपत्राणां माध्यमेन नायकस्योत्थानं यत्र प्रदर्श्यते, यद्विविधविभूतिभिः, गुणैस्तथाऽङ्कप्रवेशकाभ्यां युक्तं भवति तन्नाटकं निगद्यते। नाट्य-शास्त्रे उच्यते च-

**प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकं चैव।**
**राजर्षिवंश्यचरितं तथैव दिव्याश्रयोपेतम्॥**
**नानाविभूतिभिर्युतमृद्धिविलासादिभिर्गुणैश्चैव।**
**अङ्कप्रवेशकादयं भवति हि तन्नाटकं नाम॥**
**नृपतीनां यच्चरितं नानारसभावचेष्टितं बहुधा।**
**सुखदुःखोत्पत्तिकृतं भवति हि तन्नाटकं नाम॥**
**अस्यावस्थोपेतं कार्यं प्रसमीक्ष्य बिन्दुविस्तारात्।**
**कर्त्तव्योऽङ्कः सोऽपि गुणान्वितं नाट्यतत्त्वज्ञैः॥**[12]

इत्थं विविधाचार्याणां मतं सङ्गृह्य नाटकलक्षणमुख्यविषयाणां सविस्तारेण चर्चाऽधो वितन्यते।

### ➢ नाटकीयकथावस्तु-

केषाञ्चनालङ्कारिकाणां मतं नाटकस्याधिकारिकङ्कथावृत्तं रम्यं स्यात्। रम्येति पदेनात्र मनोहारि-त्वमिति भावः। भरतानुसारेण तु प्रख्यातवस्तुविषयं नाटकमिति। प्रख्यातेति पदेन रामायणमहा-भारत-पुराणाख्यायिकादीनां ग्रहणम्। एतेषां स्वतः प्रामाण्यमिति लोकप्रसिद्धम्।

### ➢ पञ्चसन्धिसमन्वितम्-

नाटकस्य द्वितीयं वैशिष्ट्यं भवति पञ्चसन्धिसमन्वितत्वम्। प्रत्येकस्मिन् सन्धौ एका कार्यावस्था एकाऽर्थप्रकृतिश्च भवेत्। नाटकस्येतिवृत्तस्य पञ्चपर्वाणि सन्ति। पञ्चपर्वाण्येव पञ्चसन्धयः। ते च क्रमशः मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्षसन्धिः निर्वहणसन्धिश्चेति। इत्थमेव नाटकीये संविधाने प्रयोजनसिद्धि-हेतुभूताः बीजबिन्दुपताकाप्रकरीकार्याभिधेयाः पञ्चाऽर्थप्रकृतयो यथोचितं संयोजनीयाः नाटककारैः।[13] नाटके पुराणप्रसिद्धायाः अथवा प्रतिसंस्कृतायाः कथावस्तुनः आरम्भयत्नप्राप्तिसम्भवनिय-तफलप्राप्तिफलयोगाभिधानाः भवन्ति पञ्चावस्थाः।[14] आचार्यधनञ्ज-योऽपि मनुते यत्- फलार्थिभिः प्रारब्धस्य कार्यस्य पञ्चावस्थाः भवन्ति। किञ्चिन्नामवैषम्येन दशरूपके एताः कार्यावस्थाः वर्णिताः।[15] एताः पञ्चावस्थाः पञ्चाऽर्थप्रकृतयश्च यथासंख्येन समन्विताः क्रमशः मुखप्रतिमुखगर्भविमर्शनिर्वहणादिपञ्च-सन्धयो जायन्ते।[16]

तत्र मुखसन्धौ बीजनाम्नाऽर्थप्रकृतिः, आरम्भनाम्ना कार्यावस्था भवेत्। प्रतिमुखसन्धौ बिन्दुना-म्नाऽर्थप्रकृतिः, प्रयत्ननाम्ना कार्याव-स्था, एवमेव प्रत्येकस्मिन्सन्धौ अर्थप्रकृतिः कार्यावस्था च क्रमानुसारेण प्रकल्पनीया।

### ➢ विलासद्ध्र्यादिगुणवत्-

इदञ्च नाटकस्यापरं वैशिष्ट्यं वेविद्यते। विलासशब्दस्यार्थो भवति भावाषास्सावलीलगतिः। हरिदाससिद्धान्तवागीशमहोदयेनोच्यते- विलासो धीरो दृष्टिरित्यादिना प्रागुक्तलक्षणः। ऋद्धिशब्दस्यार्थो भाषायाः गाम्भीर्य्यम्। सिद्धान्तवागीशमहोदयमते ऋद्धिर्या काचि-दुन्नतिः। एवञ्च नाटकं उत्तमाधममध्य-मपात्राणां भाषाभिर्मिश्रं कर्त्तव्यम्। नाटके उत्तममध्यमाधामपात्राणां भाषाः पृथक्-पृथक्कार्याः। सामान्यतया नाट्याचार्यैर्नृणामनीचानां कृतात्मनाञ्च भाषा संस्कृतं स्वीकृता, नारीणां भाषा प्रायः प्राकृतम्, अधमानां शूरसेन्यम्, पिशाचात्यन्तनीचानां पैशाचन्तथा मागधं निर्धार्यते।[17]

केषाञ्चन मतं विलासशब्दस्यार्थो नायकदर्शने नायिकायाः, नायिकादर्शने नायकस्य गमन-उपवेशनादि-विशेषभङ्गी अस्ति। ऋद्धिशब्दस्यार्थो नायकनायिकयोः श्रीवृद्धिः। आदिपदेन निर्जने प्रियास-मागमादीनवगच्छेत्। इत्थमेव नायकनायिकयोर्गुणद्वारा ना-टकं कविस्सौन्दर्यमण्डितं कुर्यात्।

➢ **नानाविभूतिभिस्समन्वितम्-**

विभूतिशब्दस्यार्थस्सम्पद्गौरवो वेति। अतो नाटकं भवेन्नाना-सम्पच्छोभितमर्थान्नायकनायिका-युक्तेन नाटकाङ्गयुक्तेन भाषायु-क्तेन च शोभितं भवेन्नाटकम्। पुनः केषाञ्चन मतं गुणवत्तायाः दृष्ट्या श्रेष्ठः कोऽपि व्यक्तिर्नायिकस्य कार्यसमाप्तये सहायको भवेत्।

➢ **सुखदुःखसमुद्भूतित्वं नाटकम्-**

नाटके नायकस्य नायिकायाः वा कदापि सुखस्य वर्णना कदापि दुःखस्य वर्णाना भवेत्। अर्थात् नायकनायिकयोर्जीवने सुखं दुःखञ्च पर्यायक्रमेण वर्णयेत्।

➢ **नानारसनिरन्तरम्-**

यतो हि नाटके नायकनाविकयोस्सुखं दुःखञ्च वर्णितं भवति, अतो विविधाः रसाः आगच्छन्त्येव। यदा नायकस्य दुःखं वर्ण्यते तदा करुणरसो ध्वन्यते। पुनः यदा नायकनायिकयोर्मिलनस्य वर्णना स्यात् तस्मिन्वातावरणे स्वाभाविकरूपेण शृङ्गाररस उज्जीवितो भवति। इत्थं नाटके विविधरसानां समावेशोऽवश्यं भवेत्।

➢ **पञ्चादिका दशपरस्तत्राङ्का-**

नाटके कति अङ्काः स्थास्यन्ति तस्मिन्विषये निर्दिष्टनियमो नास्ति। परन्तु पञ्चतो दशपर्यन्तमङ्काः भवेयुः। अर्थान्नाटके पञ्चस-ङ्ख्यकाङ्केभ्यो न्यूनाः अङ्काः न भवेयुः, एवञ्च दशाङ्केभ्योऽधिकाः अङ्काः न स्युः। तथा चोच्यते दशरूपके- **पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परमिति।**[18]

➢ **नाटके नायकः-**

"णीञ् प्रापणे" इत्यस्माद्धातोः ण्वुल्प्रत्ययेन निष्पद्यते नायकशब्दः। यो नाट्यप्रधानभूतेतिवृत्तस्य प्रयोजनं नयति व्याप्नोति सो नायक इति। यथोक्तं काव्यानुशासने-

**समग्रगुणः कथाव्यापी नायकः।**

**कथाप्रबन्धस्तद्व्यापि नयति व्याप्नोति इतिवृत्तं फलं चेति नायकः।**[19]

नाट्ये वस्तुरसादिसमस्तव्यापारस्य प्रधानभूतो नायक एव। यतोहि नाट्यप्रधानभूतस्य कार्यस्य सम्पादनं नायकेनैव विधीयतेऽन्यानि पात्राण्यपि मुख्यव्यापारसम्पादने तस्यैव सहाय्यं कुर्वन्ति। भरतमु-निना स्वभावमाश्रित्य नायकस्य चत्वारो भेदाः स्वीक्रियन्ते। यदुक्तं नाट्यशास्त्रे-

**धीरोद्धता धीरललिता धीरोदात्तास्तथैव च।**
**धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिता॥**[20]

नायको धीरोदात्तधीरललितधीरप्रशान्तधीरोद्धतभेदैश्चतुर्विधः। तत्र श्रीरघुनन्दनवत् गम्भीरो विनयी सर्वजनसम्मानकरीत्यादिगुणवान् धीरोदात्तः। मन्मथवत् निश्चिन्तो नवतारूण्ययुतो विदग्धो धीरल-लितेति भीमवतोद्धत आत्मप्रशंसारोषकैतवादिगुणसंयुतो धीरोद्धतः। धर्मराजयुधिष्ठिरवत् सत्याचरणौशीलो धार्मिको जितेन्द्रियः सर्व-शास्त्रवेत्ता धीरप्रशान्त इति। पुनः उदात्तादिभेदाः पूर्णतमपूर्णत-रपूर्णभदैस्त्रिभिर्गुणितैर्द्वादशेति। ब्रजलीलायां पूर्णतमः, मथुरालीला-यां पूर्णतरः, द्वारिका-लीलायां पूर्णस्वरूपात्मकः। पुनश्च पत्युपपति-त्वेन चतुर्विंशत्यात्मकाः भेदाः। एवं पुनश्च प्रत्येकमनुकूल-शठदक्षिणधृष्टचतुर्भिर्गुणितैः षण्णवतिविधनायकभेदाः। मुन्यसम्मत-त्वात् कैश्चिन्नायकस्य धूर्तादयो भेदाः न स्वीकृताः। यथोक्तमुज्ज्व-लनीलमणौ-

**उदात्ताद्यैश्चतुर्भेदैस्त्रिभिः पूर्णतमादिभिः।**
**द्वादशात्मा चतुर्विंशत्यात्मा पत्यादियुग्मतः॥**
**नायकः सोऽनुकूलाद्यैः स्यात् षण्णवतिधोदितः।**
**नोक्तो धूर्तादिभेदस्तु मुनेः संमत्यभावतः॥**[21]

भरतमुनिस्वीकृतेषु चतुर्ष भेदेषु को भेदो नाटकस्य नायकत्वेनो-पयुक्तः? विषयेऽस्मिन् नाट्यशास्त्र-ज्ञानां परस्परं वैमत्यं परिलक्ष्यते। प्रथमं नाट्यशास्त्रानुसारेण नाटकनायकस्वरूपख्यापको नाट्य-लक्ष-णांशः-

**प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकं चैव।**
**राजर्षिवंश्यचरितं तथैव दिव्याश्रयोपेतम्॥**[22]

अत्राचार्यस्वीकृते नाट्यलक्षणे "उदात्तेति" पदेन केचन धीरोदात्ता-दिभेदचतुष्टयं स्वीकुर्वन्ति, केचन धीरोदात्तमेव मन्यन्ते। श्रीमदभिन-वगुप्तेन धीरोदात्तधीरललितधीरप्रशान्तधीरोद्धताश्चत्वारो भेदाः नाट-कनायकरूपेण स्वीकृताः। यथोक्तमभिवभारत्याम्-

उदात्त इति वीररसयोग्यः उक्तः। तेन धीरललितधीरप्रशान्तधी-रोद्धतधीरोदात्ताश्चत्वारोऽपि गृह्यन्ते।[23]

प्रकृतमतस्यानुसरणं रामचन्द्रगुणचन्द्रहेमचन्द्रादयो विहितवन्तः। नाट्यदर्पणे त्वाचार्यो ये नाटकस्य नायकः केवलं धीरोदात्तमेव गृह्णन्ति तान् प्रत्याक्रोशयति। नाट्यदर्पणे स्वोपज्ञविवरणे यदुक्तम्-

**ये तु नाट्यस्य नेतारं धीरोदात्तमेव प्रतिजानते, न ते मुनिसमयाव्यव-गाहिनः, नाटकेषु धीरललितादीनामपि नायकानां दर्शनात्, कवि-समयबाह्याश्च।**[24]

विश्वनाथधनञ्जयशिङ्गभूपालादयः धीरोदात्तमेव नाटकनायकत्वे-नोपस्थापितवन्तः। धनिकानुसा-रेण धीरोदात्तादिशब्दाः यथोक्तगुण-युतावस्थायाः प्रकाशकाः। न तु जात्यादिरूपाः यथैक एव गोवत्सः त्रिसृष्ववस्थासु क्रमशो बाल्यावस्थायां वत्सः, यौवनकाले वृषभः, वृद्धावस्थायान्तु महोक्षेत्यादिरूपेण परिणतस्तथैव धीरोदात्ता-

दिशब्दाः अप्यवस्थाविशेषबोधकाः न तु जातिबोधकाः इति। अर्थाद्यस्याम-वस्थायां यो नायको यादृशैर्गुणैरभिभूतो वर्तते तद्गु-णानुवर्तिन्यैव तस्य संज्ञा। यदुक्तं धनिकावलोके- धीरललिता-दिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनः वत्सवृषभ-महोक्षा-दिवन्न जात्या कश्चिदव-स्थितरूपो ललितादिरस्ति तदा हि महाकविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसङ्गतमेव स्यात्-जातेरनपायित्वात्....... रामादेरेकप्रबन्धोपात्तान् प्रत्येकरूपत्वादार-म्भोपात्रावस्थातोऽवस्थान्तरोपादान-मन्याय्यं यथोदात्तत्वाभिमतस्य रामस्य छद्मना बालिवधान्महासत्त्वतया स्वावस्थापरित्याग इति।[25] नाटकस्य नायको देवस्स्यान्न वेत्यस्मिन्विषयेऽपि नाट्यज्ञानां नैकमत्यम्। धनञ्जयशिङ्गभूपाल-विश्वनाथादयो देवं राजानं वा नाटकस्य नायकत्वेन स्वीकुर्वन्ति। विष्णुधर्मोत्तरपुराणेऽपि यथोक्तम्-

**चरितं त्रिदशानां वा नाटकं तत्र कीर्तितम्।**[26]

परन्त्वभिनवगुप्तेन भरतप्रोक्तं "दिव्याश्रयोपेतमिति" पदांशस्य विवेचनं कुर्वता दिव्यनाटक-नायकत्वं न समर्थितम्। तन्मते तु यदा नायकभूतदेवस्य चरित्रे करुणविप्रलम्भादिरसानामवस्थितिः प्रदर्श-येत्तदा देवानामपि चरितं मानुषचरितवद्भवेदित्यस्यां दशायामबु-द्धिपूर्वकदेवचरिताधानात्प्रसिद्धि-विघातः। भारत्यां यदुक्तम्- **यदि तु मुख्यत्वेनैव देवचरितं वर्ण्यते तत्तावद्विप्रलम्भकरुणाद्भुत-भयानक-रसोचितं चेन्निबध्यते तन्मानुषचरितमेव संपद्यते प्रत्युत देवानामधि-यानं प्रसिद्धिविघातकम्।**[27] दिव्यचरितेषु दुःखस्थितेरभावात्तत्प्र-तिकारस्योपायोऽपि नाटके दर्शयितुं न शक्नोति। वरप्रभावा-धिक्यादपि देवानां नाटकनायकत्वेन प्रतिषेधः। त्रिदशानामभिला-षामात्रेण कार्यसिद्धिं यात्यतो तद्वदाचरितुं न कोऽपि नरो क्षमोऽतो नाटके मुख्यनायकरूपेण तेषां प्रतिषेधः प्रदर्शितः। भारत्यां यथा-

**अत एव हृदयसंवादोऽपि देवचरिते दुर्लभः न च तेषां दुःखमस्ति। यत्प्रतीकारोपाये व्युत्पादनं स्यात्....। प्रख्यातत्वेऽपि देवचरितं वरप्रभावादिबहुलतयोपायोपदेशायायोग्यमिति नैतदुभयं निबन्धनी-यमिति फलतः प्रतिषेधो दर्शितः।**[28] अभिनवगुप्तमते देवानामप्रधान-नायकरूपेण न काचिद्विमति-रिति। तेषां पताकाप्रकरीनायकरूपेण ग्रहणं नासमीचीनम्। तत्रैवोक्तम्- **न च सर्वथा देवचरितं तथाऽवर्णनीयम्। किन्तु दिव्यानामाश्रयत्वेन प्रकरीपताकाना-यकादिरूपेण उपेतमुपगमोऽङ्गीकरणं यत्र।**[29] परञ्च रामकृष्णादयो विहायैते नियमाः। युगपुरूषत्वात्- जगदुद्धाराय मनुष्यरूपेणावतरि-तत्त्वात् राज-स्वरूपत्वाच्च तेषां नाटके नायकत्वेन निबन्धने न दोष इति।

अधिकसंख्यकाः नाट्यज्ञाः राजानमेव नाटकनायकत्वेनोप-स्थापयन्ति। नाटके राज्ञैवचरित्रं कथमभिप्रेतमिति? नाट्यशास्त्रे यथोक्तम्-

**नृपतीनां यच्चरितं नानारसभावचेष्टितं बहुधा।**
**सुखदुःखोत्पत्तिकृतं भवति हि तन्नाटकं नाम॥**[30]

वर्ण्यमानराजचरितं विविधरसभावचेष्टावैचित्र्याद्यैः सुखदुःखोत्प-त्त्युपशमनाद्यैः सहृदयहृदयाह्लादं प्रभवितुं क्षममत एवोपनिब-द्धव्यमिति। राज्ञश्चरितमपि कीदृशं स्यात्? वर्तमानकालिको राज-चरितं नाटक-नायकत्वेनोपयुक्तं न वेति विषयेऽभिनवभारत्यां नाट्यदर्पणे चोल्लिखितम्। यदुक्तं नाट्यदर्पणे स्वोपज्ञ-विवरणे-वर्तमाने च नेतरि तत्कालप्रसिद्धिबाधया रसहानिः स्यात्, पूर्वमहा-पुरुषचरितेषु च अश्रद्धानं स्यात्। भविष्यतस्तु वृत्तं चरितमपि न भवति चर्यते स्म चरितमित्यतीति निर्देशात्। राजेतिक्षत्रियमात्रम्। न पुनरभिषिक्त एव।[31] वर्तमानकालिकराजचरितस्य नाटके नायकत्व-ग्रहणेन तात्कालिकीप्रसिद्धिविधाता-देकतो रसहनिः परश्च पूर्वकालिकराजपुरुषाणां चरितस्योपेक्षा स्यात्। अत एव भूतकालि-कराजचरितमेव नाटकनायकरूपेणाभिप्रेतम्। भरतमुनिलक्षणगत-"राजर्षिवंश्यचरितम्" इति पदांशस्याभिप्रायेऽभिन-वगुप्तो ब्रूते। नाटकनायकस्य राज्ञः एतादृशं चरितं न स्वीक्रियेत् यत्र राजा समस्तराज्यादिकं ब्राह्मणेभ्यो दत्त्वा वानप्रस्थसन्यासादिव्र-तमाचरेदिति। सुखाद्युपलब्धिरेव नाटकस्य प्रयोजनं सन्यासवान-प्रस्थव्रता-द्याचरणेन तत्र विरसत्वमायाति। एवंप्रकारेण मुनिमता-वलोके नाटकनायकस्य सर्वाङ्गीणविवेचनं स्फुटम्।

- **एक एव भवेदङ्गी-**

नाटके शृङ्गारवीररसयोः प्रधानत्वेन निवेशनं कर्तव्यम्। मुख्यरसस्तु काव्याद्यन्तं व्याप्तो भवति। स त्वङ्गीरस एव स्यात्। अपरश्च फलानुवर्ती रसः। नाटकेऽवान्तररससम्भवेऽप्यङ्गीरसः सर्वरसनिर्वा-हकास्त्वेकस्यैव प्राधान्यमिति भावः। ध्वनिकारेण यथोक्तम्-

**प्रसिद्धेऽपिप्रबन्धानां नानारसनिबन्धने।**
**एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता॥**[32]

परन्तु मतमिदं न सर्वथोपयुक्तम्। उत्तरामचरितवेणीसंहारप्रचोध-चन्द्रोदयादिषु करुणरौद्रशान्ता-दिरसानामङ्गित्वमतक्षमेव। केचित्तु शृङ्गारवीरशान्तानां मध्ये यः कश्चिदेक एव रसो नाटके प्रधानतया निबद्धव्य इति जगदुः। नाटकस्यान्ते निर्वहणसन्धौ अद्भूतरसस्य समावेशो भवेत्। तथा चोक्तं नाट्यशास्त्रे-

**सर्वेषां काव्यानां नानारसभावयुक्तियुक्तानाम्।**
**निर्वहणे कर्तव्यो नित्यं हि रसोऽद्भूतस्तज्ज्ञैः॥**[33]

- **चत्वारः पञ्च वा मुख्याः-**

नाटके चत्वारो पञ्च वा प्रधानाः पुरुषाः भवेयुः। ये विविधायाः नाटकीयघटनायाः अग्रगत्यां नायकं सहायतां करिष्यन्ति। श्लोके

चत्वारः पञ्च वेत्युक्तिरस्ति। वेति शब्देन टीकाकाराः अनाख्यातमिति मन्यन्ते। अर्थाच्चत्वारो पञ्च वा कार्यपुरुषाः नाटकस्याऽङ्के भवेयुः। काऽपि बाध्यबाधकता नास्ति। अतः त्रयो जनाः भवितुमर्हति, पुनः षट् सप्ताः वा पुरुषाः अपि भवितुमर्हन्ति।

### ➢ गोपुच्छाग्रान्तु बन्धनम्-

नाटकस्य रचना गोपुच्छसदृशं भवति। तथा चोक्तं भरतेनापि 'कार्यं गोपुच्छाग्रं कर्तव्यं बन्धमासाद्य।' किन्तु 'गोपुच्छाग्रमि'ति पदमङ्गीकृत्य टीकाकारेषु विप्रतिपत्तयस्सन्ति। तथाहि-

१. नाटके क्रमेणोत्तरोत्तरमङ्काः लघवस्स्युरिति केचित्।

२. यथा गोपुच्छे केचित् केशाः लघवः केचिद्दीर्घाश्च भवन्ति तथैव नाटके केचिदङ्काः ह्रस्वाः केचिच्च दीर्घाः कर्तव्याः इत्यन्ये ब्रुवते। एवं नाटके कानिचन कार्याणि मुखसन्धौ कानिचन प्रतिमुखसन्धौ, कानिचन च ततोऽग्रे समाप्यानि भवन्ति। वस्तुतस्तु गोः पुच्छस्याऽग्रभागे द्वित्राः केशाः, अग्रे च ततोऽधिकाः भवन्ति। तथैव नाटके आदौ कथावस्तु लघ्वाकारेणाऽऽरभ्यते, अग्रे च बृहदाकारेण वर्ण्यते।

एवं नाटकेऽवस्थाऽर्थप्रकृत्तिसन्धिप्रभृतीनां सर्वेषां नाट्यतत्त्वानां समावेशो भवति। नाटकस्य कथावस्तुनि रसविरुद्धमनुचितञ्च कथावस्त्वन्यथा प्रकल्पयेत्, अथवा तत्परित्यजेद्वेति। तथा च दशरूपके लिखितमस्ति-

**यत्तस्यानुचितं किञ्चिन्नायकस्य रसस्य वा।**

**विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्॥**[34]

यथा छद्मना बालिवधो मायुराजेनोदात्तराघवे परित्यक्तः। वीरचरिते च रावणसौहार्देन बाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः।

नाटके मञ्चस्योपरि किङ्किं न प्रदर्शनीयमित्यप्याचार्यो सागरनन्दी निर्दिष्टवान् नाटकलक्षण-रत्नकोशे-

**युद्धराज्यभ्रंशो मरणं नगरोपरोधनञ्चैव।**

**न प्रत्यक्षाणि सन्ति प्रवेशकैः संविधेयानि॥**[35]

अर्थान्मञ्चस्योपरि युद्धम्, वधः, राज्यभ्रंशः इत्यादीनि प्रत्यक्षाणि न प्रदर्शनीयानि। यदि दर्शकानां कृते ज्ञापनमावश्यकं भवेच्चेदेतत् प्रवेशकमाध्यमेन सूचनीयं नाटककारेण। अन्येष्वपि नाट्यशास्त्रीय-ग्रन्थेष्वेवम्विधनिर्देशाः प्राप्यन्ते।[36] एवं हि प्रतीयते यत्सामाजिकानां मनसि कोऽपि दुष्प्रभावो न भवेदिति विचिन्त्याचार्यैः एवंविधाः निर्देशाः दत्ताः।

धर्मार्थकामादिपुरुषार्थानामुपभोक्ता नायको भवति नाटकस्य पूर्णतायां प्रमुखो हेतुः। प्रकृतिभेदा-दाचार्याः नायकस्य धीरोदात्त-धीरललित-धीरोद्धत-धीरप्रशान्तादिभेदाः ज्ञापयन्ति। नाटके यथा पुरुष-पात्रेषु प्रमुखो नायको भवति तथैव स्त्रीपात्रेषु प्रमुखा भवति नायिका। नाटके एको नायकः एका नायिका अन्ये च सङ्कीर्णपात्राणि भवन्ति, ये नायकेन नायिकया वा कार्यव्यवहार-वशातन्मञ्चमायान्ति यान्ति च।[37] नाटकस्य नाम तस्य प्रधानवस्तु-निर्देशात्क्रियते।[38] नाटके कस्यापि कार्यविशेषस्याथवोद्देश्यस्य पूर्त्तयेऽर्थोपक्षेपकाः विधीयन्ते। नाटकलक्षणरत्नकोशानुसारं नाटके आवश्यकतानुसारमङ्कावतार-अङ्कमुख-विष्कम्भक-प्रवेशक-चूलिकेति नामकाः अर्थोपक्षेपकाः योजनीयाः।[39]

नाटके काव्यस्यालङ्कारभूतानि चत्वारि पताकास्थानानि[40] तथा शृंगार-हास्य-करुण-रौद्र-वीर-भयानक-विभत्साद्भुतसंज्ञकाः अष्टौ रसाः विधातव्याः।[41] विलासविन्यासक्रमो वृत्तिरथवा नेपथ्यगीतवादित्ररसभावाभिनयनृत्यजातीनां क्वापि विशेषे वर्त्तनं वृत्तिः। वृत्तीनां विषये आचार्यसागरनन्दी नाटकलक्षणरत्नकोशे विस्तरेण वर्णनं व्यधायि। तन्मतानुसारं नाटके भारती-सात्त्वति-कैशिकी-आरभटी-वृत्तयः कर्तव्याः।

### ➢ उपसंहारः-

इत्थं नाटकलक्षणरत्नकोशे नाटकस्य सुसम्बद्धं विवेचनमाचार्य-सागरनन्दिना विहितम्। स्वग्रन्थे नाटकस्य सम्पूर्णं स्वरूपमेकस्मिन् पद्ये निबन्धयता तेन निगदितम्-

**पञ्च पञ्च चतुःषष्ठिश्चतुरष्टैकविंशतिः।**

**षट्त्रिंशन्नवतिर्यत्र तदाहुर्नाटकं बुधाः॥**[42]

अर्थाद्यत्र ०५ कार्यावस्थाः, ०५ अर्थप्रकृतयः, ६४ सन्ध्यङ्गानि, ०४ वृत्तयः, ०८ रसाः, २१ संध्यन्तराणि, ३६ लक्षणानि तथा ९० (नाट्यालङ्काराणि- ३३, शिल्पकाङ्गानि- २७, भाणाङ्गानि- १०, वीथ्यङ्गानि- १३, भाणिकाङ्गानि- ०७, योगः- ९०) यत्र भवेयुः तन्नाटकं कथ्यते। इत्थं साहित्यदर्पणकार-नाट्यदर्पणकार-दशरूपककार-धन्यालोककारादीनां मतमत्र सम्यग्रूपेण पाठकानां सौविध्याय प्रतिपादितमिति शम्।

### ➢ सन्दर्भग्रन्थसूची-


1. **अलङ्कारशास्त्र की परम्परा।** डा. राजवंशसहायः 'हीरा'। चौखम्बाप्रकाशनम्, वाराणसी
2. **अष्टाध्यायी।** पाणिनिः। व्याख्या. डा. नरेशझा। चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०१७
3. **उज्ज्वलनीलमणिः।** श्रीरूपगोस्वामी। गौडीयवेदान्तप्रकाशनम्, वृन्दावनम्, २००६
4. **काव्यदर्पणः।** श्रीराजचूडामणिदीक्षितः। डा.लता। न्यूभारतीबुककार्पेरेशन- २००२
5. **काव्यानुशानम्।** हेमचन्द्रः। सम्पा. पण्डितशिवदत्तशर्मा। गोपीनाथपुरोहितपुस्तकालयः, वनस्थली विद्यापीठम्।

6. **काव्यप्रकाश (प्रदीपटीका)।** मम्मटः। टीकाकारः-भट्ट वामनाचार्य, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, संस्करणम्-२०१३
7. **काव्यप्रकाशः (ज्योतिष्मती टीका)।** मम्मटः। व्याख्या. रामसागरत्रिपाठी। मोतीलालबनारसीदासः, वाराणसी प्रथमसंस्करणम्- १९-८२ भा-ग-१
8. **काव्यप्रकाशः (ज्योतिष्मती टीका)।** मम्मटः। व्याख्याकारः डा. रामसागरत्रिपाठी। मोतीलालबनारसीदासः, वाराणसी प्रथमसंस्करणम्-१९८३ भाग-२
9. **काव्यप्रकाशः(नागेश्वरीटीका)।** मम्मटः। व्याख्या. श्रीहरिशंकरशर्मा, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्,पुनर्मुद्रणम्-वि०सं०-२०७०
10. **दशरूपकम्।** धनञ्जयः। पं. बदरीनाथशर्मा। चौखम्बासंस्कृतसीरीज, वाराणसी, १९५३
11. **ध्वन्यालोकः।** आनन्दवर्धनः। व्याख्या. रामसागरत्रिपाठी। मोतीलाल-बनारसीदासः, दिल्ली, संस्करणम्-२०१७
12. **नाट्यदर्पणम्।** रामचन्द्रगुणचन्द्रः। व्याख्या. थानेश्वरचन्द्रउप्रेती। परिमल पब्लिकेशन्स, दिल्ली, २०१२
13. **नाट्यशास्त्रम्।** भरतमुनिः। बाबूलालशुक्लः। चौखम्बासंस्कृतसंस्थानम्, वाराणसी, १९८५
14. **नाट्यशास्त्रस्येहित्यस्येतिहासः।** आचार्यजगदीशचन्द्रमिश्रः। चौखम्बा-सुरभारतीप्रकाशनम्, वाराणसी, संस्करण-२०१८
15. **नाटकलक्षणरत्नकोशः।** सागरनन्दी। चौखम्बासंस्कृतसीरीज, वाराणसी, १९७२
16. **महाभाष्यम् (पस्पशाह्निकम्)।** पतञ्जलिः। व्याख्या. जयशङ्क-रलालत्रिपाठी। चौखम्बा-कृष्णदास-अकादमी, वाराणसी संस्करणम्-तृतीयम्-२००७
17. **रसगङ्गाधरः।** जगन्नाथः। सम्पा. बद्रीनाथझा तथा मदनमोहनझा। चौखम्बाविद्याभवनम्, वाराणसी, पुनर्मुद्रितम् संस्करणम्-२०१३ (द्वितीयभागः)
18. **रसार्णवसुधाकरः।** श्रीशिङ्गभूपालः। व्याख्या. डा.जमुनापाठकः। चौखम्बासंस्कृसीरीज-ऑफिस, वाराणसी, २००४
19. **श्रीमद्भगवद्गीता।** सम्पा.- स्वामी राममुखदासः। साधक सञ्जीवनी, गीताप्रेस, गोरखपुर, २००४।
20. **साहित्यदर्पणः।** विश्वनाथः। डा.सत्यव्रतसिंहः। चौखम्बाविद्याभवनम्, वाराणसी, १९६४
21. **संस्कृतकाव्यस्योद्भवस्तथा विकासक्रमः।** जाह्नवीचरणभौमिकः। कलिकाता, संस्कृत पुस्तक भाण्डार, १९९७

**सन्दर्भ**

1. नाट्यशास्त्रम्, कारिका- १८।२-३
2. नाट्यशास्त्रम्, कारिका- १८।७
3. रसार्णवसुधाकरः, पुटसंख्या- ३९५
4. नाट्यशास्त्रम्, प्रथमोऽध्यायः|
5. काव्यालङ्कारसूत्रवृत्तिः- १/३
6. साहित्यदर्पणः- ६।७-११
7. नाटकलक्षणरत्नकोशः, पुटसंख्या- ०६
8. महारसं महाभोग्यमुदारवचनान्वितम्| महापुरुषसंचारं सालंकारन्तु नाटकम्॥ नाटकलक्षणरत्नकोशः, पुटसंख्या- ०६
9. नाटकलक्षणरत्नकोशः, पुटसंख्या-०७
10. नाटकलक्षणरत्नकोशः, पुटसंख्या-११५
11. नाटकलक्षणरत्नकोशः, पुटसंख्या-०९-१०
12. नाट्यशास्त्रम्- १८।१०-१३
13. नाटकलक्षणरत्नकोशः, पुटसंख्या-२१
14. नाटकलक्षणरत्नकोशः, पुटसंख्या-०८
15. दशरूपकम्- ०१/१८
16. नाटकलक्षणरत्नकोशः, पुटसंख्या-४५
17. दशरूपकम्- २/५९-६०
18. दशरूपकम्, पुटसंख्या- ६७
19. काव्यानुशासनम्- ७।२९५-२९६
20. नाट्यशास्त्रम्- २४।१७
21. उज्ज्वलनीलमणिः(नायकभेदप्रकरणम्)- ४२-४३
22. नाट्यशास्त्रम्- १८।१०
23. नाट्यशास्त्रम्(अभिनवभारतीयुतम्), पुटसंख्या- ६२८
24. नाट्यदर्पणः, स्वोपज्ञविवरणम्, पुटसंख्या- १७४
25. दशरूपकम्, धनिकावलोकः, पुटसंख्या- ११६
26. नाट्यशास्त्रस्येतिहासः, पुटसंख्या- १४३
27. नाट्यशास्त्रम्(अभिनववभारतीयुतम्), पुटसंख्या- ६२९
28. नाट्यशास्त्रम्(अभिनववभारतीयुतम्), पुटसंख्या- ३२९
29. नाट्यशास्त्रम्(अभिनववभारतीयुतम्), पुटसंख्या- ६२८
30. नाट्यशास्त्रम्- १८।१२
31. नाट्यदर्पणः, स्वोपज्ञविवरणम्, पुटसंख्या- १७३
32. ध्वन्यालोकः, तृतीय उद्योतः, कारिका- २१
33. नाट्यशास्त्रम, अष्टादशोऽध्यायः
34. दशरूपकम्
35. नाटकलक्षणरत्नकोशः, पुटसंख्या-४१
36. नाट्यशास्त्रम्- २०/२१, दशरूपकम्- ३/३१
37. नाटकलक्षणरत्नकोशः, पुटसंख्या-२७-२८
38. नाटकलक्षणरत्नकोशः, पुटसंख्या-४०
39. नाटकलक्षणरत्नकोशः, पुटसंख्या-४१
40. नाटकलक्षणरत्नकोशः, पुटसंख्या-१००
41. नाटकलक्षणरत्नकोशः, पुटसंख्या-१८२
42. नाटकलक्षणरत्नकोशः, पुटसंख्या-१८१